ह्यनादिकालप्रवृत्तानां कर्म्मणां क्षयाभावे मोक्षाभावः स्यात्। न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवत् भवितुमर्हति, अनित्यत्वप्रसङ्गात् परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य। तस्मात् ब्रह्माधिगमे दुरितक्षय इति स्थितम्”। भा०

“इतरस्याप्येवमसंश्लेषः पाते तु” ४।१।१४ सू०

“पूर्वस्मिन्नधिकरणे बन्धहेतोरघस्य स्वाभाविकस्याश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ, धर्मस्य पुनः शास्त्रीयत्वात् शास्त्रीयेण ज्ञानेनाविरोध इत्याशङ्क्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते। इतरस्यापि पुण्यस्य कर्मण एवमघवदसंश्लेषो विनाशश्च ज्ञानवतो भवतः। कुतः, तस्यापि स्वफलहेतुत्वेन ज्ञानफलप्रतिबन्धित्वप्रसङ्गात्। “उभे उ हैवैष एतेन तरति” इत्यादिश्रुतिषु दुष्कृतवत् सुकृतस्यापि प्रणाशव्यपदेशात् अकर्त्रात्मबोधनिमित्तस्य च कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् “क्षीयन्ते चास्य कर्माणि” इति चाविशेषश्रुतेः। यत्रापि केवल एव पाप्मशब्दः पठ्यते तत्रापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यं, ज्ञानापेक्षया निकृष्टफलत्वात्। अस्ति च श्रुतौ पुण्येऽपि पाप्मशब्दः ‘नैनं सेतुमहोरात्रे तरतः’ इत्यत्र सह दुष्कृतेन सुकृतमप्यनुक्रम्य “सर्वे पाप्मानोऽतो निवर्त्तन्ते” इत्यविशेषेणैव प्रकृतेषु पाप्मशब्दप्रयोगात्। पाते त्विति। तुशब्दोऽवधारणार्थः। एवं धर्म्माधर्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यम्भाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति।” भा०

“अनारब्धकार्य्ये एव तु पूर्वे तदवधेः।” ४।१।१५ सू०

“पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः, स किमविशेषेणारब्धकार्य्ययोरनारब्धकार्य्ययोश्च भवत्युत विशेषेणानारब्धकार्य्ययोरेवेति विचार्य्यते। तत्र “उभे उ हैवैष एतेन तरति” इत्येवमादिश्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते प्रत्याह अनारब्धकार्य्ये एव त्विति। अप्रवृत्ते फले एव पूर्वे जन्मान्तरसञ्चिते अस्मिन्नपि च जन्मनि प्राक् ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते नत्वारब्धकार्य्ये सामिभुक्तफले याभ्यामेतत् ब्रह्मज्ञानायतनं जन्म निर्म्मितम्। कुत एतत्, “तस्य तावदेव चिरं यावन्न विमोक्ष्ये” इति शरीरपातावधिकरणात् क्षेमप्राप्तेः, इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत। ननु वस्तुबलेनैवायमकर्त्रात्मत्वबोधः कर्म्माणि क्षपयन् कथं कानिचित् क्षपयेत् कानिचिच्चोपेक्षेत, न हि समानेऽग्निबीजसम्पर्के केषाञ्चिद्बीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्त्तुमिति। उच्यते, न तावदनाश्रित्यारब्धकार्य्यं कर्म्माशयं ज्ञानोत्पत्तिरुपपद्यते, आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्यान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम्, अकर्त्रात्मत्वबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्म्माण्युच्छिनत्ति, बाधितमपि मिथ्याज्ञानं द्विचन्द्रादिज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्त्तत एव। अपि च नैवात्र विवदितव्यं ब्रह्मविदः कञ्चित् कालं शरीरं ध्रियते न ध्रियत इति। कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणञ्चापरेण प्रतिक्षेप्तुं शक्येत। श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्द्देशेनैतदेव निरुच्यते। तस्मादनारब्धकार्य्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति निर्णयः।” भा०

“भोगेन त्वितरे क्षपयित्वा सम्पद्यते” ४।१।१९ सू०

“अनारब्धकार्य्ययोः पुण्यपापयोर्विद्यासामर्थ्यात् क्षय उक्तः, इतरे त्वारब्धकार्य्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म सम्पद्यते “तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये” इति “ब्रह्मैव सन् ब्रह्माप्येति” इति चैवमादिश्रुतिभ्यः। ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवृत्तमेवं पश्चादप्यनुवर्त्तेत। न, निमित्ताभावात्। उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं, न च तादृशमत्र किञ्चिदस्ति। नन्वपरः कर्म्माशयोऽभिनवमुपभोगमारप्स्यते। न, तस्य दग्धबीजत्वात्। मिथ्याज्ञानावष्टम्भं हि कर्म्मान्तरं देहपाते उपभोगान्तरमारभते, तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमित्यतः साध्वेतदारब्धकार्य्यक्षये विदुषः कैवल्यमवश्यम्भावीति।” ४।१। भा०

“यत्तु सञ्चितं कर्म्मान्तरं तन्न निमित्तं फलस्य दग्धमूलत्वात्। अविद्यादयो हि क्लेशाः कर्मणस्तत्फलस्य च मूलम्। तदुक्तं योगशास्त्रे “क्लेशमूलः कर्म्माशयः सति मूले तद्विपाकः” इति तच्च मूलं ज्ञानाग्निना दग्धमिति कुतः पुनः संसारः तस्माद्देहपाते कैवल्यमिति सिद्धम्” आ० गि०

सांख्यकारिकायां तत्त्वकौमुद्यामत्रविशेषो उक्तो यथा “सम्यग्ज्ञानाधिगमाद्धर्म्मादीनामकारणप्राप्तौ। तिष्ठति